*** अधोलिखितपदानां सन्धिः सन्धिं विच्छेदं वा कृत्वा।** **[12]**

1. गतिर्गन्तव्या - __________

   **उत्तर :** गतिः + गन्तव्या
2. नृपतिरपि - __________

   **उत्तर :** नृपतिः + अपि
3. नेदानीं - __________

   **उत्तर :** न + इदानीम्
4. प्रायच्छत् - __________

   **उत्तर :** प्र + अयच्छत्
5. राज्यभङ्गस्ते - __________

   **उत्तर :** राज्यभङ्गः + ते
6. वार्ताऽन्या - __________

   **उत्तर :** वार्ता + अन्या
7. शूद्रकोऽपि - __________

   **उत्तर :** शूद्रकः + अपि
8. सर्वेषामदृश्य - __________

   **उत्तर :** सर्वेषाम् + अदृश्य
9. इत्युक्त्वा - __________

   **उत्तर :** इति + उक्त्वा
10. प्रीतास्मि - __________

    **उत्तर :** प्रीता + अस्मि
11. पुनर्भूपालेन - __________

    **उत्तर :** पुनः + भूपालेन
12. महीपतिस्तस्मै - __________

    **उत्तर :** महीपतिः + तस्मै

*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[10]**

13. शक्तिधरः कः आसीत्?

    (A) वीरवरस्य पिता (B) वीरवरस्य पुत्र (C) वीरवरस्य भ्राता (D) वीरवरस्य मित्रम्

    **उत्तर :** (B) वीरवरस्य पुत्र
14. वीरवरः किं स्वपरिवारं प्राबोधयत्?

    (A) राजाज्ञाम् (B) राजलक्ष्मीसंवादम् (C) युद्धवार्ताम् (D) धनप्राप्तिम्

**उत्तर :** (B) राजलक्ष्मीसंवादम्

15. कः प्रथमं स्वशिरः पातयितुम् इच्छति स्म?

(A) वीरवरः (B) शक्तिधरः (C) वीरवती (D) राजा

**उत्तर:** (A) वीरवरः

16. ते सर्वे कस्याः आयतनं गताः?

(A) लक्ष्म्या (B) दुर्गायाः (C) सर्वमङ्गलायाः (D) सरस्वत्याः

**उत्तर :** (C) सर्वमङ्गलायाः

17. धन्यः अहम् इति कः अवदत्?

(A) वीरवरः (B) शक्तिधरः (C) राजा (D) मन्त्री

**उत्तर :** (B) शक्तिधरः

18. भगवती का अदृश्या अभवत्?

(A) लक्ष्मी (B) सर्वमङ्गला (C) दुर्गा (D) पार्वती

**उत्तर :** (B) सर्वमङ्गला

19. राजा कुत्र प्राविशत्?

(A) मन्दिरम् (B) वनम् (C) स्वप्रासादम् (D) नगरम्

**उत्तर :** (C) स्वप्रासादम्

20. राजा प्रातः वीरवरम् किम् अपृच्छत्?

(A) कुत्र गतवान् त्वम् (B) किं कृतवान् त्वम् (C) ह्यः रात्रौ किम् अभवत् (D) किमर्थं गतवान्

**उत्तर :** (C) ह्यः रात्रौ किम् अभवत्

21. केन सदृशः लोके न भूतो न भविष्यति?

(A) राज्ञा (B) वीरवरेण (C) मन्त्रिणा (D) शक्तिधरेण

**उत्तर :** (B) वीरवरेण

22. राजा वीरवराय किं प्रायच्छत्?

(A) धनम् (B) समग्रकर्णाट प्रदेशम् (C) सुवर्णम् (D) रत्नानि

**उत्तर :** (B) समग्रकर्णाट प्रदेशम्

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा।** **[6]**

23. अनेन सदृशो लोके न भूतो न ____________। (भविष्यति / वदिष्यति)

**उत्तर :** भविष्यति

24. ततो देवी गता ____________। (अदर्शनम / सुदर्शनम्)

**उत्तर :** अदर्शनम्

25. पुत्रवियुक्तस्य मे जीवनं ____________। (निष्फलम् / सार्थकम्)

**उत्तर :** निष्फलम्

26. मया गृहीतस्वामिवर्तनस्य निस्तारो ____________। (स्वपुत्रसमर्पणेन / स्वसमर्पणेन)

**उत्तर :** स्वपुत्रसमर्पणेन

27. यदि मयि कृपा भगवत्या जाता, तदा __________ शेषेणापि प्रत्यावर्तते। (ममायुः / पूर्णायुः)

**उत्तर :** ममायुः

28. वीरवरोऽपि पुनः __________ सेवानिरतोऽभवत्। (द्वारि / द्वारम)

**उत्तर :** द्वारि

*** स्तम्भयोः मेलनं कुरुत।** **[8]**

| अ | ब |
|---|---|
| 29. रोदनपरा | (क) मुझ में |
| 30. दुहित्रा | (ख) प्रणाम करके |
| 31. प्रणिपत्य | (ग) पुत्री |
| 32. मयि | (घ) रोती हुई |

**उत्तर :** (1 - घ, 2 - ग, 3 - ख, 4 - क)

| अ | ब |
|---|---|
| 33. प्रत्यावर्तेत | (क) प्रसन्न हूँ |
| 34. प्रीतास्मि | (ख) वापस लौटना |
| 35. अन्येद्युः | (ग) तुझ में |
| 36. त्वयि | (घ) दूसरे दिन |

**उत्तर :** (1 - ख, 2 - क, 3 - घ, 4 - ग)

*** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत।** **[10]**

37. ते सर्वे कुत्र गताः?

**उत्तर :** आयतनम्/मन्दिरम्।

38. देव्याः अपराधेन कः पञ्चत्वं याति?

**उत्तर :** शूद्रकः।

39. राज्येन जीवितेन वा कस्य प्रयोजनं नास्ति?

**उत्तर :** राजानम्।

40. वीरवती कस्य भगिनी आसीत्?

**उत्तर :** शक्तिधरस्य।

41. वीरवरः किं अवर्णयत्?

**उत्तर :** राजलक्ष्मीसंवादम्।

42. देवी राज्ञः कस्य कार्येणपरं प्रीतास्ति?

**उत्तर :** सत्वोत्कर्षण भृत्यवात्सल्येन च।

43. देव्यै सर्वमङ्गलायै समर्पणाय किम् वस्तु इष्टः अस्ति?

**उत्तर :** वीरवरस्य स्वप्रियं वस्तु।

44. शूद्रकस्य दीर्घायुः उपायं कः पृच्छति?

**उत्तर :** वीरवरः।

45. रोदनपरा नारी का अस्ति?

**उत्तर :** राजलक्ष्मी।

46. शूद्रकस्य नगर्याः नाम किम्?

**उत्तर :** शोभावती।

*** पूर्णवाक्येन उत्तरं लिखत।** **[26]**

47. प्राज्ञः धनानि जीवितञ्च केभ्यः उत्सृजेत्?

**उत्तर :** प्राज्ञः (बुद्धिमान् व्यक्तिः) धनानि जीवितं च परार्थे (परोपकारार्थं) उत्सृजेत्। सन्निमिते (सत्कारणार्थं) त्यागः वरम् (श्रेष्ठः) अस्ति।

48. का अदृश्या अभवत्?

**उत्तर :** भगवती सर्वमङ्गला अदृश्या अभवत्। सा सर्वेषां त्यागं, भक्तिं च दृष्ट्वा प्रसन्ना अभवत् तथा सर्वान् जीवितवती कृत्वा अदृश्या अभवत्।

49. केन सदृशः लोके न भूतो न भविष्यति?

**उत्तर :** वीरवरेण सदृशः लोके न भूतः न भविष्यति। तस्य इयं निःस्वार्था त्यागः, स्वामिभक्तिः च अद्वितीया आसीत्। ईदृशः वीरः पूर्वं न जातः न च भविष्यति।

50. वीरवरः किम् अवर्णयत्?

**उत्तर :** वीरवरः स्वपरिवारं प्रति अखिलं राजलक्ष्मीसंवादम् अवर्णयत्। सः तेभ्यः सर्वां वार्तां कथितवान् यत् राजलक्ष्मीः किम् उक्तवती।

51. प्रातः राजा वीरवरम् किम् अपृच्छत्?

**उत्तर :** प्रातः राजा शूद्रकः वीरवरम् अपृच्छत्-"ह्यः रात्रौ किम् अभवत्? सा नारी का आसीत्? किमर्थं सा क्रन्दति स्म?

52. का अदृश्या अभवत्?

**उत्तर :** भगवती सर्वमङ्गला अदृश्या अभवत्। सा वीरवरस्य परिवारस्य त्यागं भक्तिं च दृष्ट्वा अत्यन्तं प्रसन्ना अभवत् तथा च सर्वान् जीवितवती कृत्वा अदृश्या अभवत्।

53. केन सदृशः लोके न भूतो न भविष्यति?

**उत्तर :** वीरवरेण सदृशः लोके न भूतः न भविष्यति। तस्य त्यागः, स्वामिभक्ति निःस्वार्थ सेवा च अतुलनीया आसीत्। ईदृशः वीरः पूर्वं न जातः न च भविष्यति।

54. वीरवरेण राज्ञे किं उक्तम्?

**उत्तर :** वीरवरेण राज्ञे उक्तम्-"स्वामिन्! न कापि वार्ता। सा नारी अदृश्या अभवत्। भगवत्याः कृपया सर्वं कुशलम् अभवत्।

55. सपरिवारः वीरवरः कुत्र गतवान्?

**उत्तर :** सपरिवारः वीरवरः देवी सर्वमंङ्गलायाः आयतनं सर्वस्व-समर्पणाय गतवान्।

56. सपरिवारः वीरवरः कुत्र गतवान्?

**उत्तर :** सपरिवारः वीरवरः स्वगृहं गतवान्। भगवत्याः कृपया सर्वे जीवितवन्तः अतः ते सुखेन स्वगृहं प्रत्यागताः।

57. देवी राजानम् प्रति केन कारणेण प्रीतास्ति?

**उत्तर :** राज्ञः सत्वोत्कर्षण भृत्यवात्सल्येन च देवी परम प्रीतास्ति।

58. महीपतिः वीरवराय किं प्रायच्छत्?

**उत्तर :** महीपतिः शूद्रकः राजपुत्राय वीरवराय समग्रं कर्णाटप्रदेशं प्रायच्छत्। सः वीरवरस्य त्यागेन, साहसेन, स्वामिभक्त्या च अत्यन्तं प्रभावितः आसीत्।

59. राजा आत्मानं शेषेणापि आयूः कस्मै प्रदातुं प्रार्थयते?

**उत्तर :** राजा आत्मानं शेषेणापि आयुः वीरवरः सह पुत्रेण पत्न्या दुहित्रा च प्रदातुं प्रार्थयते।

*** रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत। [11]**

60. ततस्ते सर्वे <u>सर्वमङ्गलाया</u> आयतनं गताः।

**उत्तर :** ततस्ते सर्वे **कस्याः** आयतनं गताः?

61. वीरवरः वर्तनस्य निस्तारं <u>पुत्रोत्सर्गेण</u> अकरोत्।

**उत्तर :** वीरवरः वर्तनस्य निस्तारं **केन** अकरोत्?

62. <u>वीरवरो</u> पत्नीं पुत्रं दुहितरञ्च प्राबोधयत्।

**उत्तर : कः** पत्नीं पुत्रं दुहितरञ्च प्राबोधयत्?

63. महीपतिः <u>वीरवराय</u> समग्रकर्णाटप्रदेशम् अयच्छत्।

**उत्तर :** महीपतिः **कस्मै** समग्रकर्णाटप्रदेशम् अयच्छत्?

64. राजा <u>स्वप्रासादं</u> प्राविशत्।

**उत्तर :** राजा **कुत्र** प्राविशत्?

65. <u>शूद्रकः</u> राजा आसीत्।

**उत्तर : कः** राजा आसीत्?

66. वीरवरः <u>वृत्त्यर्थं</u> आगतः आसीत्।

**उत्तर :** वीरवरः **किमर्थं** आगतः आसीत्?

67. वीरवरः परिवारेण सह <u>आयतनं</u> अगच्छत्।

**उत्तर :** वीरवरः परिवारेण सह **कुत्र** अगच्छत्?

68. <u>वीरवरः</u> सपरिवारो सानन्दम् स्वगृहं गतः।

**उत्तर : कः** सपरिवारो सानन्दम् स्वगृहं गतः?

69. महीपति समग्रकर्णाटप्रदेशं <u>राजपुत्राय</u> प्रायच्छत्।

**उत्तर :** महीपति समग्रकर्णाटप्रदेशं **कस्मै** प्रायच्छत्?

70. वीरवरः राज्ञः समीपं गन्तुं इच्छति स्म।

**उत्तर :** वीरवरः **कुत्र** गन्तुं इच्छति स्म?

*** अधोलिखितानि क्रम रहित वाक्यानि घटना क्रमानुसारं संयोजनयत।** **[3]**

71. (क) सर्वं दृष्ट्वा राजा शूद्रकः अपि सर्वस्वार्थसमर्पणार्थं सिद्धः अभवत्।
(ख) पितुः वार्तां श्रुत्वा शक्तिधरः प्रसन्नतया स्वस्य समर्पणार्थं सिद्धः अभवत्।
(ग) प्रातः राजा वीरवरम् अपृच्छत् 'ह्यः रात्रौ किम् अभवत्'?
(घ) वीरवरो गृहं गत्वा पत्नीं पुत्रं पुत्रीञ्च प्राबोधयत्, सर्वां च वार्ताम् अकथयत्।
(ङ) भगवती प्रसन्ना अभवत्। भगवत्याः कृपया सर्वे मिलितवन्तः।
(च) वीरवरः परिवारेण सह सर्वस्वसमर्पणम् अकरोत्।

**उत्तर :** (घ) वीरवरो गृहं गत्वा पत्नीं पुत्रं पुत्रीञ्च प्राबोधयत्, सर्वां च वार्ताम् अकथयत्।
(ख) पितुः वार्ता श्रुत्वा शक्तिधरः प्रसन्नतया स्वस्य समर्पणार्थं सिद्धः अभवत् ।
(च) वीरवरः परिवारेण सह सर्वस्वसमर्पणम् अकरोत् ।
(क) सर्वं दृष्ट्वा राजा शूद्रकः अपि सर्वस्वसमर्पणार्थं सिद्धः अभवत् ।
(ङ) भगवती प्रसन्ना अभवत्। भगवत्याः कृपया सर्वे मिलितवन्तः।
(ग) प्रातः राजा वीरवरम् अपृच्छत् 'ह्यः रात्रौ किम् अभवत् '?

*** अधोलिखित गद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[21]**

72. देवी - (ततः प्रत्यक्षीभूतया भगवत्या सर्वमङ्गलया राज्ञः करं धृत्वा) वत्स! प्रसन्ना भवामि त्वयि, अलं साहसेन। नेदानीं राज्यभङ्गस्ते भविष्यति।

राजा - (साष्टाङ्ग प्रणिपत्य) भगवति! न मे प्रयोजनं राज्येन जीवितेन वा। यदि मयि कृपा भगवत्या जाता, तदा ममायुः शेषेणापि प्रत्यावर्तेत राजपुत्रो वीरवरः सह पुत्रेण पत्न्या दुहित्रा च। अन्यथा मया यथाप्राप्ता गतिर्गन्तव्या जगदम्ब!

देवी - वत्स! अनेन ते सत्त्वोत्कर्षेण भृत्यवात्सल्येन च परं प्रीतास्मि। तद् गच्छ, विजयी भव। अयमपि सपरिवारो जयतु राजपुत्र आदर्शचरितो वीरवरः।

ततो देवी गताऽदर्शनम्। ततो वीरवरः सपरिवारो सानन्दं स्वगृहं गतः। नृपतिरपि सर्वेषामदृश्य एव स्वप्रासादं प्राविशत्। अन्येद्युः वीरवरोऽपि पुनः द्वारि सेवानिरतोऽभवत्।

राजा - (तं वीक्ष्य) का वार्ता राजपुत्र!

वीरवरः - देव! सा रोदनपरा नारी मद्दर्शनाददृश्यतां गता। न हि कापि वार्ताऽन्या स्वामिन्!

ततः परमां प्रीतिं गतो महीपतिस्तस्मै प्रायच्छत् समग्रकर्णाटप्रदेशं राजपुत्राय वीरवराय।

I. एकपदेन उत्तरत -
(i) देवी राजानं किम् आशीर्वादति?
(ii) वीरवरः कस्य सेवायां निरत् अभवत्?

II. पूर्णवाक्येन उत्तरत -
राजा वीरवराय किं ददाति परमां प्रीतिं गतः?

III. निर्देशानुसारम् उत्तरत -
(i) वीरवरः कस्य दर्शनात् नारीं रोदनपरां अदृश्यतां गतां कथति?
(अ) राजस्य (ब) देव्याः (स) स्वस्य (द) भृत्यस्य
(ii) राजा देव्याः समक्षं किं निष्कामं कथति?

(अ) केवलं राज्यस्य रक्षाम् (ब) सपरिवारस्य प्रत्यावर्तनम्
(स) जीवितस्य रक्षाम् (द) धनस्य संनादनम्
(iii) देवी कदा अदर्शनं गता?
(अ) आशीर्वादात् पश्चात् (ब) राज्ञः प्रणामात् पश्चात्
(स) वीरवरस्य आगमनात् पश्चात् (द) राजस्य निवेदनात् पूर्वम्

**उत्तर :** I. (i) विजयम्
(ii) राजसेवायाम्
II. राजा परमां प्रीतिं गतः वीरवराय समग्रकर्णाटप्रदेशं ददाति।
III. (i) (स) स्वस्य
(ii) (ब) सपरिवारस्य प्रत्यावर्तनम्
(iii) (अ) आशीर्वादात् पश्चात्

73. अथ राजपुत्रो वीरवरो स्वावासं गत्वा निद्रालसां पत्नीं पुत्रं दुहितरञ्च प्राबोधयत् अखिलराजलक्ष्मीसंवादं च अवर्णयत्।
शक्तिधरः - (तच्छ्रुत्वा सानन्दम्) हे पितः! जानाम्यहं भवतः सर्वप्रियं वस्तु। तद् अहमेव भवतः प्रियतमः इति सर्वविदितः। धन्योऽहं स्वामिजीवितरक्षार्थं यदि विनियुक्तः। तत् कोऽधुना विलम्बस्तात ? एवंविधे कर्मणि राष्ट्रस्य राज्ञश्च हिताय मम सर्वस्वविनियोगः परमश्लाघ्यः।
यतः - धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥
वेदरता - यद्येवम् अस्मत्कुलोचितं नाचरितव्यं तर्हि गृहीतस्वामिवर्तनस्य कथं निस्तारो भवेत् ?
वीरवती - धन्याहं यस्या ईदृशो जनको भ्राता च। तत् कथं विलम्ब्यते? एष एव गृहीतस्वामिवर्तनस्य निस्तारस्य उपायः।
( ततस्ते सर्वे सर्वमङ्गलाया आयतनं गताः)
(देवीपूजां विधाय) भगवति! प्रसीद, विजयतां महाराजः शूद्रकः, गृह्यतामेष मद्दत्त उपहारः।
I. एकपदेन उत्तरत -
(i) वीरवरः - किं स्व परिवारं प्राबोधयत्?
(ii) ते सर्वे कस्याः आयतनं गताः?
II. पूर्णवाक्येन उत्तरत -
वीरवरः किम् अवर्णयत्?
III. निर्देशानुसारम् उत्तरत -
(i) तद् अहमेव भवतः <u>प्रियतमः</u> इति सर्वविदितः। रेखाङ्कितपदे कः प्रत्ययः?
(अ) तम् (ब) तुमुन् (स) तमप् (द) क्त्वा
(ii) हे पितः! जानाम्यहं <u>भवतः</u> सर्वप्रियं वस्तु। अत्र <u>भवतः</u> सर्वनाम् कस्मै प्रयुक्तम्?
(अ) वीरवराय (ब) शूद्रकाय (स) शक्तिधराय (द) न कोऽपि
(iii) सर्वे सर्वमङ्गलायाः <u>आयतनं</u> गताः - अत्र आयतनं पदस्य उपर्युक्त अर्थ अस्ति।
(अ) परिसरं (ब) आङ्गनं (स) द्वावेव (द) न कोऽपि

**उत्तर :** I. (i) राजलक्ष्मीसंवादम्
(ii) सर्वमङ्गलायाः
II. वीरवरः स्वपरिवारं प्रति अखिलं राजलक्ष्मी संवादं अवर्णयत्।
III. (i) (स) तमप्

(ii) (अ) वीरवराय

(iii) (स) द्वावेव

74. वीरवरः - (स्वगतम्) कृतो मया गृहीतस्वामिवर्तनस्य निस्तारो स्वपुत्रसमर्पणेन। अधुना पुत्रवियुक्तस्य मे जीवनं निष्फलम्।

(ततः सः आत्मानमपि देव्यै समर्पितवान्। ततस्तस्य पत्न्या दुहित्रा च तदेवाचरितम्। राजा शूद्रकोऽपि तेषां सर्वेषां सर्वमेतद् आचरितम् तददृश्य एवालोकयत्।)

ततोऽसौ व्यचिन्तयत्-

जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।

अनेन सदृशो लोके न भूतो न भविष्यति ॥

तदेतत्परित्यक्तेन मम राज्येनापि किं प्रयोजनम्।

(देवीं प्रति प्रकटयन्) हे मातः! सर्वमङ्गले! गृहाण मे सर्वस्वम्। नेष्टं मे राज्यं न च जीवितं वा।

I. एकपदेन उत्तरत -

(i) "जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः" इति कः व्यचिन्तयत्?

(ii) "पुत्रवियुक्तस्य मे जीवनं निष्फलम्" कस्य जीवनं निष्फलम् ?

II. पूर्णवाक्येन उत्तरत -

राजा शूद्रकः तेषां सर्वेषां यत् आचरितम् तत् कथम् आलोकयत्?

III. निर्देशानुसारम् उत्तरत -

(i) कः प्रथमं स्वशिरः पातयितुम् इच्छति स्म?

(अ) वीरवरः (ब) शक्तिधरः (स) वीरवती (द) राजा

(ii) केन सदृशः लोके न भूतो न भविष्यति?

(अ) राज्ञा (ब) वीरवरेण (स) मन्त्रिणा (द) शक्तिधरेण

(iii) भगवती का अदृश्या अभवत्?

(अ) लक्ष्मीः (ब) सर्वमङ्गला (स) दुर्गा (द) पार्वती

**उत्तर :** I. (i) शूद्रकः

(ii) वीरवरः

II. राजा शूद्रकः तेषां सर्वेषां यत् आचरितम् तत् अदृश्य एव आलोकयत्।

III. (i) (अ) वीरवरः

(ii) (ब) वीरवरेण

(iii) (ब) सर्वमङ्गला

----- -----